संस्कृत-वार्ता:

दिनाङ्क: 13.02.2026 प्रात: - 06:55

अथ वार्ताः

## प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्री नरेन्द्रमोदी अद्य राष्ट्रिय – राजधान्यां सेवा तीर्थ इति भवनसङ्कुलस्य अनावरणं विदध्यात्। एतस्मिनेव अवसरे प्रधानमन्त्री सेवातीर्थस्य अथ कर्तव्य-भवनस्य प्रथमद्वितीययो: परिसस्य च उद्घाटनमपि कुर्यात्। सायङ्काले प्रधानमन्त्री नरेन्द्रमोदी सेवा -तीर्थ –परिसरे जनसभामपि सम्बोधयेत्। एतत् उद्घाटनं प्रधान्मत्रिण मोदिन: आधुनिक – कुशल – सुलभ नागरिककेन्द्रित – शासन – प्रणाल्या: निर्माण-प्रतिबद्धतां प्रदर्शयति। सेवा-तीर्थे प्रधानमन्त्रि-कार्यालय: राष्ट्रिय-सुरक्षा – परिषद सचिवालय:, मन्त्रिमण्डल- सचिवालयश्च स्थित:, ये च प्राक् अपरत्र स्थिता: आसन्। नूतन-भवन-परिसरे आधुनिक-भविष्यगत-प्राशासनिक-कार्याणि समेकितानि अस्ति।

## रक्षा-अधिग्रहण-परिषद्- डीएसी राफेलः

रक्षा-अधिग्रहण-परिषदा सशस्त्र-बलानां क्षमता-भिवर्धनाय सार्धत्रिलक्षाधिककोटिरूप्यक-मूल्यस्य प्रस्तावाः स्वीकृताः।

रक्षामन्त्रालयेन सूचितं यत् भारतीय-वायुदलेन बहु-भूमिका-युक्त-युद्धविमानानां (MRFA) रफ़ेल्-विमानानां, युद्ध-क्षिपणिनां, वायु-नौकायान-आधारित-उच्च-ऊर्ध्वता-स्यूडो-उपग्रहस्य (AS-HAPS) क्रयणाय च आवश्यकतां स्वीकर्तुं (AoN) अनुमतिः दत्तः इति।

## केन्द्रीय: कृषि-मन्त्रि

शिवराज-सिंह-चौहान: लोकसभायां विपक्षनेतारं राहुल-गान्धिनं कट्वालोचयन् प्रोक्तवान् यत् राहुल-गांधी देशस्य कृषकाणां न केनापि प्रकारेण चिन्तां करोति। संचार-तन्त्र-पटेल श्री चौहान: प्रतिपादितवान् यत् राहुल-गांधी कृषकाणां सशक्तिकरणेन सहमतं न, अपितु वारं-वारं राष्ट्र-रोधि-वक्तव्यानि तेन प्रकाशितानि। श्री चौहान: सबलं प्रतिपदिवान् यत् प्रधानमन्त्री नरेन्द्रमोदी कृषकाणां हितं सर्वोपरि-प्राथमिकतां प्रददाति, अथ शासनस्य सर्वे निर्णया: हितमाध्यमेन एव प्रकल्पिता:।

## वाणिज्योद्योग – मन्त्री

पीयूष – गोयल : लोकसभायां विपक्ष-नेतारं राहुल-गान्धिनं भ्रमप्रद-निराधार-वक्तव्य-प्रदान-कारणेन कट्वालोचितवान्। संचार-तन्त्रपटे श्री गोयल: विज्ञापितवान् यत् राहुल-गांधी असत्य-वक्तव्यानां माध्यमेन करोति। असौ प्रोक्तवान यत् प्रधानमत्रिण: मोदिन: नेतृत्व – शासने कृषक-हितानि सदैव सुरक्षितानि।

**बाड्गादेशस्य**

त्रयोदशे राष्ट्यि-संसदीय-निर्वाचने बाड्गलादेश-राष्टवादी-पार्टी-बीएनपी-दलं प्रारम्भिक- मतगणना सूचनानुसारेण महत्वपूर्ण-विजयं प्रति अग्रेसरति। वार्ताहरप्रतिवेदनानुसारेण बीएनपी दलाध्यक्ष: तारिक – रह्मान इत्यसौ ढाका-सप्तदश, अथ बागुरा-षट् - इत्युभयो: निर्वाचन – क्षेत्रयो: निर्णायकं विजयं सम्प्राप्तवान्। तत्रैव रंगपुर-प्रथम-इति निर्वाचन-क्षेत्रे जमात-ए-इस्लामी-दलस्य मोहम्मद-रेहान-सिराज-इत्यसौ अनौपचारिकरूपेण विजय: समुद्घोषित:। अवधेयं यत् बाड्गलादेशे जनमतसङ्ग्रहाय च मतदानं प्रचालितम्।

**पुरूषाणां विंशति: प्रतिविंशति:**

क्रिकेट्-विश्व – चषक- प्रतिस्पर्धायां गतरात्रौ दिल्लीस्थे अरूण – जेटली – क्रीडांगणे समायोजिते द्वन्द्वे भारतेन नामीबिया दलं त्रि-नवति - धावनांकै: पराजितम्। स्पर्धायां प्रथम दण्डेन क्रीडयता भारतेन नवाधिक-शतं धावनांका:समर्जिता: प्रत्युतरे नामीबिया-दलस्य पर्याय: षोडशाधिक शतं धावनांकेषु एव समाप्तो जात:।

**दिल्लीस्थान**

भारतीय - प्रविधि संस्थानस्य अथ दिल्ली -प्रान्त – संस्कृत भारत्याश्च संयुक्ततत्वाधाने दश-दिवसीयानां षट्- संस्कृत-सम्भाषण - शिविराणां साफल्येण आयोजनम् अभवत् यत्र संस्थानस्य, यत्र संस्थानस्य त्रिशतं संख्याका: छात्राः भागं गृहीतवन्तः।

।। **इति वार्ता:**।।